प्रथमा दीक्षा : सम्भाषणम्

अधिकारी

अद्य/ह्यः

भूते क्तवतु

अधिकारी - सुधाकर । शीघ्रं लिपिकारम् आह्वयतु ।

सुधाकरः -अद्य लिपिकारः नागतवान् । "सः हरिद्वारं गतवान्" इति ।

अधिकारी - ह्यः वित्तकोषतः धनम् आनीतवान् किम् ?

सुधाकरः - आम् । ह्यः अहं रमेशः च वित्तकोषं गतवन्तौ । धनम् आनीतवन्तौ अपि ।

अधिकारी - ह्यः सर्वे किं किं कार्यं कृतवन्तः ?

सुधाकरः - ह्यः रामगोपालः गणनां समापितवान् 'गीता पत्राणि लिखितवती' गौरीशः कार्याणि परिशीलितवान् । ह्यः चन्नम्मा नागतवती । मुकुन्दः स्वच्छीकृतवान् ।

अधिकारी - चन्नम्मा कुत्र कतवती इति किं कोऽपि जानाति ?

सुधाकरः - चन्नम्मा तीव्रम् अस्वस्था इति शृणुमः ।

अधिकारी - सा औषधं स्वीकृतवती स्यात् खलु ?

सुधाकरः - वैद्यः सूच्यौषधं दत्तवान् इति श्रुतम् । ह्यः निवेदिता- विद्यालयस्य शिक्षिकाः आगतवत्यः । भवान् न आसीत् । अतः एकं पत्रं दत्तवत्यः ।

अधिकारी - प्राचार्या मुख्याध्यपिका च किम् आगतवत्यौ ?

सुधाकरः - नैव, केवलं प्राचार्या आगतवती । 'भवान् दूरवाणीं करोतु' इति उक्तवती ।

अधिकारी - भवतु भवान् गच्छति ।